vishvAkarmopaniShat

# વિશ્વાકર્મોપનિષત્

## Document Information

Text title : Vishvakarma Upanishat

File name : vishvakarmopaniShat.itx

Category : upanishhat, deities_misc

Location : doc_upanishhat

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi PSA Easwaran

Latest update : July 8, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 17, 2024

*sanskritdocuments.org*

# વિશ્વાકર્મોપનિષત્

અથ વિશ્વાકર્મોપનિષત્ ।
જ્યોતિર્મયં શાન્તમયં પ્રદીપ્તં, વિશ્વાત્મકં વિશ્વજિતન્નિરીશમ્ ।
અદ્યન્તશૂન્યં સકલૈકનાથં, શ્રીવિશ્વકર્માણમહં નમામિ ॥

ૐ વિશ્વકર્મા દિશાં પતિઃ સ નઃ પશૂન્પાતુ સોઽસ્માન્પાતુ તસ્મૈ નમઃ ।
પ્રજાપતિરુદ્રો વરુણોઽગ્નિર્દિશામ્પતિઃ સ નઃ
પશૂન્પાતુ સોઽસ્માન્પાતુ તસ્મૈ નમઃ ॥

અથ પુરુષો હ વૈ વિશ્વકર્મણો કામયત પ્રજાઃ સૃજેયેતિ ।
વિશ્વકર્મણઃ પ્રાણો જાયતે મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુર્જ્યોતિરાપઃ પૃથિવી વિશ્વસ્ય ધારિણી ॥

વિશ્વકર્મણો બ્રહ્મા જાયતે । વિશ્વકર્મણો રુદ્રો જાયતે ।
વિશ્વકર્મણો નારાયણો જાયતે । વિશ્વકર્મણઃ પ્રજાપતયઃ પ્રજાયન્તે ।

વિશ્વકર્મણો દ્વાદશાદિત્યા રુદ્રા વસવઃ સર્વે દેવતાઃ સર્વે
ઋષયઃ સર્વાણિ છન્દાંસિ સર્વાણિ ભૂતાનિ વા સમુત્પદ્યન્તે ।
વિશ્વકર્મણિ પ્રવર્ધન્તે । વિશ્વકર્મણિ પ્રલીયન્તે ।

ૐ અથ નિત્યો દેવો એકો વિશ્વકર્મા । યો દેવાનાં નામધારી
એક એવ વિશ્વકર્મા । વિરાટ વિશ્વકર્મા । સ્વરાડ્વિશ્વકર્મા ।
સમ્રાડ્વિશ્વકર્મા ।

અથ રુદ્રો વિશ્વકર્મા । બ્રહ્મા વિશ્વકર્મા । શિવશ્ચ
વિશ્વકર્મા । વિષ્ણુશ્ચ વિશ્વકર્મા । શક્રશ્ચ વિશ્વકર્મા ।
દ્યાવાપૃથિવ્યૌ ચ વિશ્વકર્મા । કાલશ્ચ વિશ્વકર્મા ।
દિશશ્ચ વિશ્વકર્મા । દિક્ચક્રશ્ચ વિશ્વકર્મા । અગ્નિશ્ચ વિશ્વકર્મા ।
ઊર્ધ્વશ્ચ વિશ્વકર્મા । અધશ્ચ વિશ્વકર્મા । અવાન્તરશ્ચ વિશ્વકર્મા ।
અન્તર્બહિશ્ચ વિશ્વકર્મા । વિશ્વકર્મણો નિરાકૃતિઃ ।

વિશ્વકર્મણ એવેદં સર્વં યદ્ભૂતં યચ્ચ ભવ્યમ્ ।
નિષ્કલઙ્કો નિરઞ્જનો નિર્વિકલ્પો નિરાખ્યાતઃ ॥

શુદ્ધાદ્વૈતૈકો વિશ્વકર્મા, ન દ્વિતીયોઽસ્તિ કશ્ચિત્ ।
ય એવં વેદ સ વિશ્વકર્મારો ભવતિ ॥

ૐ ઇત્યગ્રે વ્યાહરેત્ । નમેતિ પશ્ચાત્ । વિશ્વકર્મણેઃ ઇતિ ઉપરિષ્ઠાત્ ।
ૐ ઇત્યેકાક્ષરં નમ ઇતિ દ્વે અક્ષરે વિશ્વકર્મણ ઇતિ પઞ્ચાક્ષરાણિ ॥ ૐ ॥

વિશ્વકર્મણ ઇતિ ષડક્ષરાણિ ।
ૐ નમો વિશ્વકર્મણ ઇત્યષ્ટાક્ષરં પદં ધ્યાયેતિ ।
અન પ્રબ્રવસ્સર્વ આયુરોત ।
વિન્દતે પ્રાજાપત્યં રાયસ્પોષકં ગૌપત્યમ્ ॥

તતો અમૃતત્ત્વમશ્નુતે । ઇતિ એવં વેદ ।

પ્રત્યગાનન્દ બ્રહ્મ પુરુષં પ્રણવસ્વરૂપમ્ ।
અકાર, ઉકારો, મકાર ઇતિ । તાનેકધારમમરત્તદેતદ્ગોમિતિ ।
યમુક્ત્વા મુચ્યતે યોગી જન્મસંસારબન્ધનાત્ ॥

ૐ નમો વિશ્વકર્મણ ઇતિ મમોપાસકઃ સાયુજ્યે ગમિષ્યતિ ।
તદિદં પરં પુણ્ડરીકં વિજ્ઞાન ધનમ્ ।
તસ્માત્ તદિદાવન્માત્રં બ્રહ્મણ્યો વિશ્વકર્મોમ્ ।
સર્વભૂતસ્થમેકં વિશ્વકર્માણં કારણરૂપં મકાર
પરવિશ્વબ્રહ્મોમ્ । પદં વિષ્ટાવાખ્યમિતિ તેઽપિ
વિશ્વકર્માખ્યોપનિષદમ્ । યો હ વૈ વિશ્વકર્મણ્યોપનિષદમધીતે ।
સર્વેભ્યો પાપેભ્યો વિમુક્તો ભવતિ । સ સર્વેભ્યઃ વિમુક્તઃ
સર્વાન્કામાનવાપ્નોતિ । બ્રહ્મત્વં ચ ગચ્છતિ । ઇત્યુપનિષત્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Proofread by Sunder Hattangadi, PSA Easwaran

*vishvAkarmopaniShat*
pdf was typeset on January 17, 2024

Please send corrections to *sanskrit@cheerful.com*